ॐ

- मणिरत्नमाला -

- प्रश्नोत्तरी -

अपारसंसारसमुद्रमध्ये
सम्मज्जतो मे शरणं किमास्ति।
गुरो कृपालो कृपया वदैतत्
विश्वेशपादाम्बुजदीर्घनौका॥१॥

बद्धो हि को यो विषयानुरागी
का वा विमुक्तिर्विषये विरक्तिः।
को वास्ति घोरो नरकः स्वदेह
स्तृष्णाक्षयः स्वर्गपदं किमास्ति॥२॥

© www.madhaveeraghuveer.com

संसारहृत्कः श्रुतिजात्मबोधः
को मोक्षहेतुः कथितः स एव ।
द्वारं किमेकं नरकस्य नारी
का स्वर्गदा प्राणभृतामहिंसा ॥३॥

शेते सुखं कस्तु समाधिनिष्ठो
जागर्ति को वा सदसद्विवेकी ।
के शत्रवः सन्ति निजेन्द्रियाणि
तान्येव मित्राणि जितानि यानि ॥४॥

© www.mahaveeraghuveer.com

को वा दरिद्रो हि विशालतृष्णः
श्रीमांश्च को यस्य समस्ततोषः।
जीवन्मृतः कस्तु निरुद्यमो यः
किं वामृतं स्यात्सुखदा निराशा॥ ५॥

पाशो हि को यो ममताभिमानः
सम्मोहत्येव सुरेव का स्त्री।
को वा महान्धो मदनातुरो यो
मृत्युश्च को वापयशः स्वकीयम्॥ ६॥

© www.madhaveeraghuveer.com

| S | M | T | W | T | F | S |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | | | | |

JUNE 2015

को वा गुरुर्यो हि हितोपदेष्टा
शिष्यस्तु को यो गुरुभक्त एव।
को दीर्घरोगो भव एव साधो
किमौषधं तस्य विचार एव॥८॥

किं भूषणाद् भूषणमस्ति शीलं
तीर्थं परं किं स्वमनो विशुद्धम्।
किमत्र हेयं कनकं च कान्ता
श्राव्यं सदा किं गुरुवेदवाक्यम्॥

© www.madhuveeraghuveer.com

के हेतवो बन्धगतेषु सन्ति
सत्सङ्गतिर्दानविचारतोषाः ।
8
के सन्ति सन्तोऽखिलवीतरागा
अपास्तमोहाः शिवतत्त्वनिष्ठाः ॥९॥

9

10

11

12

1

2

को वा ज्वरः प्राणभृतां हि चिन्ता
3
मूर्खोऽस्ति को यस्तु विवेकहीनः ।
कार्या प्रिया का शिवविष्णुभक्तिः
किं जीवनं दोषविवर्जितं यत् ॥१०॥

SUNDAY 12

© www.madhaveeraghuveer.com

| S | M | T | W | T | F | S |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | | | | |

JUNE - 2015

विद्या हि का ब्रह्मगतिप्रदा या
बोधो हि को यस्तु विमुक्तिहेतुः।
को लाभ आत्मावगमो हि यो वै
जितं जगत् केन मनो हि येन॥११॥

शूरात् महाशूरतमोऽस्ति को वा
मनोजबाणैर्व्यथितो न यस्तु।
प्राज्ञोऽथ धीरश्च समस्तु को वा
प्राप्तो न मोहं ललनाकटाक्षैः॥१२॥

© www.madhaveeraghuveer.com

विषात् विषं किं विषयाः समस्ता।
दुःखी सदा को विषयानुरागी।
धन्योऽस्तु को यस्तु परोपकारी
कः पूजनीयः शिवतत्त्वनिष्ठः ॥१३॥

सर्वास्ववस्थास्वपि किन्न कार्यं
किं वा विधेयं विदुषा प्रयत्नात्।
स्नेहं च पापं पठनं च धर्मं
संसारमूलं हि किमास्ति चिन्ता ॥१४॥

© www.madhaveeraghuveer.com

विद्वान्महाविज्ञतमोऽस्ति को वा
नार्याः पिशाच्या न च वंचितो यः।
का शृंखला प्राणभृतां हि नारी
दिव्यं व्रतं किं च समस्तदैन्यम् ॥१५॥

ज्ञातुं न शक्यं च किमास्ति सर्वैः
योषिन्मनो यच्चरितं तदीयम्।
का दुस्त्यजा सर्वजनैर्दुराशा
विद्याविहीनः पशुरास्ति को वा ॥१६॥

© www.madhuraveeraghuveer.com

वासो न सङ्गः सह कैर्विधेयो
मूर्खैश्च नीचैश्च खलैश्च पापैः।
मुमुक्षुणा किं त्वरितं विधेयं
सत्सङ्गतिर्निर्ममतेशभक्तिः॥१७॥

लघुत्वमूलं च किमर्थितैव
गुरुत्वमूलं यदयाचनं च।
जातो हि को यस्य पुनर्न जन्म
को वा मृतो यस्य पुनर्न मृत्युः॥१८॥

© www.madhaveeraghuveer.com

| S | M | T | W | T | F | S |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | | | | |

JUNE - 2015

मूकोऽस्ति को वा बधिरश्च को वा
वक्तुं न युक्तं समये समर्थः।
तथ्यं सुपथ्यं न श्रृणोति वाक्यं
विश्वासपात्रं न किमास्ति नारी॥१९॥

तत्वं किमेकं शिवमद्वितीयं
किमुत्तमं सच्चरितं यदास्ति।
त्याज्यं सुखं किं स्त्रियमेव सम्यक
देयं परं किं त्वभयं सदैव॥२०॥

© www.mahaveeraghuveer.com

शत्रोर्महाशत्रुतमोऽस्ति को वा
8 कामः सकोपानृतलोभतृष्णः।
न पूर्यते को विषयैः स एव
9 किं दुःखमूलं ममताभिमानम्॥२१॥

10

11

12

1

2

किं मण्डनं साक्षरता मुखस्य
3 सत्यं च किं भूतहितं सदैव।
किं कर्म कृत्वा न हि शोचनीयं
कामारिकंसारिसमर्चनाख्यम्॥२२॥

SUNDAY 19

© www.madhaveeraghuveer.com

| S | M | T | W | T | F | S |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| 7 | 8 | 9 | 10 | 11 | 12 | 13 |
| 14 | 15 | 16 | 17 | 18 | 19 | 20 |
| 21 | 22 | 23 | 24 | 25 | 26 | 27 |
| 28 | 29 | 30 | | | | |

JUNE 2015

कस्यास्ति नाशो मनसो हि मोक्षः
क्व सर्वथा नास्ति भयं विमुक्तौ।
शल्यं परं किं निजमूर्खतैव
के के ह्युपास्या गुरुदेववृद्धाः॥२३॥

उपस्थिते प्राणहरे कृतान्ते
किमाशु कार्यं सुधिया प्रयत्नात्।
वाक्कायचित्तैः सुखदं यमघ्नं
मुरारिपादाम्बुजचिन्तनं च॥२४॥

© www.madhaveeraghuveer.com

के दस्यवः सन्ति कुवासनाख्याः
कः शोभते यः सदसि प्रविद्यः।
मातेव का या सुखदा सुविद्या
किमेधते दानवशात्सुविद्या ॥२५॥

कुतो हि भीतिः सततं विधेया
लोकापवादात् भवकाननाच्च।
को वातिबन्धुः पितरश्च के वा
विपत्सहायः परिपालका ये ॥२६॥

© www.madhaveeraghuveer.com

बुद्ध्वा न बोध्यं परिशिष्यते किं
शिवप्रसाद सुखबोधरूपम् ।
8 ज्ञाते नु कास्मिन् विदितं जगत् स्यात्
सर्वात्मके ब्रह्मणि पूर्णरूपे ॥२७॥

9 ★

10

11

12

1

2

किं दुर्लभं सद्गुरुरस्ति लोके
3 सत्सङ्गतिर्ब्रह्मविचारणा च ।
त्यागो हि सर्वस्य शिवात्मबोधः
4 को दुर्जयः सर्वजनैर्मनोजः ॥२८॥

5 ★

6

© www.mahaveeraghuveer.com

पशो: पशु: को न करोति धर्मं
प्राधीतशास्त्रोऽपि न चात्मबोध:।
किन्तद्विषं भाति सुधोपमं स्त्री
के शत्रवो मित्रवदात्मजाद्या: ॥२९॥

विद्युच्चलं किं धनयौवनायु
र्दानं परं किञ्च सुपात्रदत्तम्।
कण्ठङ्गतैरप्यसुभिर्न कार्यं
किं किं विधेयं मलिनं शिवार्चा॥३०॥

© www.madhuveeraghuveer.com

| JUNE - 2015 | M | T | W | T | F | S |
|---|---|---|---|---|---|---|
| | 1 | 2 | 3 | 4 | 5 | 6 |
| | 8 | 9 | 10 | 11 | 12 | 13 |
| | 15 | 16 | 17 | 18 | 19 | 20 |
| | 22 | 23 | 24 | 25 | 26 | 27 |
| | 29 | 30 | | | | |

अहर्निशं किं परिचिन्तनीयं
संसारमिथ्यात्वशिवात्मतत्त्वम्।
किं कर्म यत्प्रीतिकरं मुरारेः
क्वास्था न कार्या सततं भवाब्धौ॥

कण्ठङ्गता वा श्रवणाङ्गता वा
प्रश्नोत्तराख्या मणिरत्नमाला।
तनोतु मोदं विदुषां सुरम्यं
रमेशगौरीशकथेव सद्यः॥३२॥

प्रश्नोत्तरी नावाची ही मणिरत्नमाला जो कोणी कंठामध्ये धारण करेल किंवा जो याचे श्रध्दापूर्वक श्रवण करेल, त्याला लक्ष्मीपति भगवान् विष्णु आणि उमापति शंकराच्या कथेप्रमाणे विद्वानांना सुंदर आनंद देणारी व वाढवणारी ठरेल.

© www.madhaveeraghuveer.com